Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313


# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७७
फेब्रुआरी - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10


## चिन्तनम्

सतीशः गज्जर्

### श्मशानगृहम्

उन्मत्तस्य मनुष्यस्य अपि मनसि काचित् स्वकीया मान्यता – धारणा प्रच्छन्नतया उपविष्टा भवति। तां च दृढं धारयितुं तस्य अधिकारोऽपि अस्ति। अहमपि एतादृशीनां बहूनां मान्यतानां स्वामी अस्मि। अहमपि मम मान्यतानां संरक्षणं संवर्धनं च करोमि। मम एका मान्यता विचित्रा अस्ति। अतः एव विचारणीया अपि अस्ति।

द्वयोः गृहयोः मध्ये काचित् वामना भीत्तिः भवद्भिः दृष्टा स्यात्। सा द्वयोः गृहिण्योः परस्परं सम्पूर्णं देहं दर्शयितुं समर्था न स्यात्, किन्तु मुखदर्शनं कारयितुं निश्चयेन समर्था स्यात्। अपि च भित्तिसाक्षिकं द्वयोः गृहिण्योः विचाराणां विनिमयः नितरां भवति। अथ सम्भाषणस्य ये केऽपि विचाराः द्वयोः मध्ये गमनागमनं कुर्वन्ति, ते एव विचाराः वस्तुतः राष्ट्रस्य सामान्याः विचाराः सन्ति। ते एव समग्रस्य राष्ट्रस्य वैचारिकं स्तरं सूचयन्ति। तथैव ताम्बूलगृहेषु स्थितानां साधारणानां मनुष्याणां वार्तालापस्य ये चर्चाविषयाः भवन्ति, ते एव सफलस्य राष्ट्रस्य विचाराः सन्ति। कस्यचित् राष्ट्रस्य स्वभावः ज्ञातव्यः चेत् प्रमाणं किम्? साधारणमनुष्यस्य स्वभावः एव राष्ट्रस्य स्वभावः अस्ति। प्रत्येकं राष्ट्रे बुद्धिमन्तः जनाः यत् चिन्तयन्ति तत् तु लोकमानसस्य अतीव सीमितं स्वरूपमात्रम्। तस्य गणना राष्ट्रिये स्तरे भवितुं नार्हति। कृष्णः, बुद्धः, महावीरः इत्यादयः अनेके महामानवाः समाजाय उत्कृष्टान् विचारान् दत्तवन्तः। भासकालिदासबाणादयः उत्तमं साहित्यं सृष्टवन्तः। तत् सर्वं भारतस्य गौरवमेव। तथापि भारतस्य स्वभावः ज्ञातव्यः चेत् अस्माभिः कश्चित् साधारणजनः एव अन्वेष्टव्यः भवति।

एषः विषयः अत्रैव समाप्तिं न गच्छति। राष्ट्रस्य एतादृशस्य सामान्यमनुष्यस्य वैचारिकं स्तरं वर्धयितुं किं करणीयम्? इति चिन्तनीयम्। एतत् कर्तव्यम् अस्ति शिक्षणसंस्थानाम्। अस्माकं शिक्षणसंस्थानानि पण्डितान्, विज्ञानिनः,वैद्यान्, उद्योगपतीन् वा निर्मातुं शक्नुवन्ति। परन्तु द्वयोः गृहिण्योः वार्तालापस्य वैचारिकं स्तरं वर्धयितुं शक्नुवन्ति? अद्यतनाः विश्वविद्यालयाः एतत् मूलभूतं कार्यं कर्तुं न शक्नुयुः चेत्, तेषाम् उत्तुङ्गानां भवनानां किमपि विशिष्टं प्रयोजनं नास्ति। विश्वविद्यालयीयं शिक्षणं साधारणं मनुष्यं स्प्रष्टुं न शक्नोति। अतः एव तत् शिक्षणं निष्प्राणम् अस्ति। साधारणजनसम्बद्धं शिक्षणमेव वस्तुतः शिक्षणम् उच्यते। मानवसमाजः पाण्डित्येन विना जीवितुं शक्ष्यति, परन्तु विवेकेन विना जीवितुं न शक्ष्यति। विश्वविद्यालयस्य परिमलः साधारण–मनुष्यस्य कृते नास्ति किम्? अस्माकं देशे शिखरे ब्रह्मजिज्ञासा नृत्यति, अधः उपत्यकायां घोरं तमसं सुखेन शेते। एतत् विश्वव्यापि तमसं दूरीकर्तुं यत् शिक्षणसंस्थानं सामर्थ्यं धारयति, सः खलु विश्वविद्यालयः, अन्यत् सर्वं श्मशानगृहम्!

# निःश्रेयः कुरु कर्म

व्योम शाहः



पुरा दक्षिणे भारते कश्चिद् ऋद्धिमान् ग्रामः आसीत् । तत्र ग्राम्याः सुखेन जीवन्ति स्म । तेषु काचिद् वत्सला नामधेया महिला निवसति स्म । तस्याः एकः पुत्रः जातः । सः बहु-पटुः आसीत् । एकाकिन्या मात्रा सः वात्सल्येन च महता कष्टेन च पालितः । तस्मै अध्ययनं बहु रोचते स्म । सः पठन् एव कालं यापयति स्म । क्रमशः सः ज्ञानेन वृद्धः  वयसा च युवा सञ्जातः । कालक्रमेण तस्य माता अपि वृद्धा जाता । तस्य माता चिन्तिता यद् यदा अहं न भविष्यामि तदा मम पुत्रस्य पालनं कः करिष्यति ?

दिनेषु गतेषु तस्याः चिन्ता अवर्धत । सा स्वस्य पुत्रस्य कृते योग्यां कन्यां प्राप्तुं प्रयत्नम् अकरोत् । "न निश्चितार्थाः विरमन्ति धीराः ।" इति पङ्क्तिं सार्थकीकुर्वत्या तया अदूरस्थे ग्रामे एका उत्तमा गुणिनी कुलीना च कन्या प्राप्ता । माता तस्याः विषये पुत्राय अकथयत् । मातुः वचनं श्रुत्वा सः उक्तवान् – "अहं तस्याः कन्यायाः पित्रा मेलितुम् इच्छामि ।" पुत्र्याः विवाहाय उत्सुकः पिता तत्र समागतः ।

पिता तेन युवकेन एकान्ते मिलितवान् । सः युवकः उक्तवान् – "आदरणीय महोदय ! मम जीवनस्य लक्ष्यम् अस्ति यद् अहम् आचार्याणां शङ्कराचार्याणां ब्रह्मसूत्रस्य भाष्यमधिकृत्य एकां टीकां रचयेयम् । ते ग्रन्थाः मत्कृते प्राणाद् अपि प्रियतराः सन्ति । अतः एतस्यां परिस्थितौ अहं गृहस्थाश्रमस्य पालनं कर्तुं न शक्ष्यामि । अहं शङ्के यद् अहं पतिधर्मस्य पालनं कर्तुं समर्थः न भविष्यामि । मम मनसि श्रीब्रह्मसूत्रभाष्याद् ऋते किञ्चिदपि नास्ति । अतः भवान् स्वीयां पुत्रीं पृष्ट्वा उचितं निर्णयं गृह्णातु" इति।  युवकस्य वचनेन सत्यनिष्ठया च सः प्रभावितः । ततः पुत्र्याः पिता स्वस्य ग्रामं गत्वा स्वपुत्रीं सर्वं वृत्तान्तम् उक्तवान् । पितुः वचनं श्रुत्वा सा कन्या उक्तवती – "सः यत् कथयति तत् सर्वमपि अङ्गीकरोमि । किन्तु अहं तेन सह एव जीवितुम् इच्छामि ।" अपरस्मिन् दिने सः पुनः तेन युवकेन मेलितुं तस्य ग्रामं गतवान् । सः तं सर्वमपि वृत्तान्तम् उक्तवान् पृष्टवान् च – "सम्प्रति किं भवान् मम पुत्र्या मेलितुम् इच्छति ?" युवकः प्रत्युदितवान् – "सर्वं ज्ञात्वाऽपि सा मम चयनम् अकरोत् अतः तां 'न' इति वक्तुं मम अधिकारः नास्ति ।"

ततः व्यास-पूर्णिमा-दिने तयोः विवाहः सम्पन्नः । विवाहदिने एव गृहं प्राप्य सः युवकः पृष्ठे लेखितुम् उपविष्टवान् । आदिनं सः ताडपत्रेषु लेखनकार्यमेव करोति स्म । पत्नीधर्मम् आचरन्ती सा कन्या सदैव पत्युः

निःस्वार्थ-सेवायां रता आसीत्। यदाऽपि सः लेखितुम् उपविशति स्म तदा सः ताडपत्राणि स्वस्य स्थाने प्राप्नोति स्म। मषी अपि प्रतिदिनं सम्पूर्णा भवति स्म। दीपेषु अपि तैलं पर्याप्तम् एव भवति स्म। यथासमयं भोजनं अपि सः प्राप्नोति स्म। सः कदापि एतेषु विषयेषु विचारमपि न अकरोत्।

दिनानि व्यतीतानि । मासाः व्यतीताः । वर्षाणि व्यतीतानि । कदाचिद् एकस्यां निशायां तस्य भाष्यलेखनस्य कार्यं समाप्तम् अभवत्। स्वस्य आसनात् उत्तिष्ठन् सः काञ्चित् महिलां दृष्टवान्। सा तस्मै भोजनं परिवेषयति स्म । पत्युः मुखे शङ्काभावं ज्ञात्वा सा उक्तवती – "अहं भवतः पत्नी भामती । लेखने एव सदा दत्तचित्तः भवान् तदेव विस्मृतवान् यद् भवतः विवाहः कदा अभवत् ।" एतत् श्रुत्वा तस्य नेत्राभ्याम् अश्रूणि निपतितानि किन्तु भामत्याः मुखे स्मितम् आसीत्। सः उक्तवान् "एतौ हस्तौ वर्षेभ्यः मम सेवायाम् आस्तां किन्तु अहं तौ परिज्ञातुम् असमर्थः सञ्जातः। इदानीं मया भवतीं ज्ञातुं विलम्बः कृतः। मया प्रतिज्ञा कृता आसीत् यत् यदा मम लेखनकार्यं समाप्तं भविष्यति तदा अहं संन्यासं ग्रहीष्यामि। अतः मम गमनस्य समयः आगतः।" इत्युक्त्वा सः दुःखितः।

पत्युः वचनं श्रुत्वा भामती प्रत्युदितवती –"अहं प्रतिदिनं भवतः प्रतिक्षां करोमि स्म । किन्तु चिन्ता मास्तु । इदं ननु मम सौभाग्यं यद् अहं भवतः सेवां कर्तुम् अवसरं प्राप्तवती ।" एतत् श्रुत्वा सः उक्तवान् – "मादृशाः भाष्यकाराः जगति सुलभाः। किन्तु कोऽपि मादृशः सौभाग्यशाली नास्ति येन भवादृशी गृहिणी प्राप्ता। मम जीवने मया यत्किञ्चिद् अर्जितं तत् सर्वम् अहं भवत्यै समर्पयामि।"

यः विद्वान् एतादृशम् अवदत् तस्य विदुषः नाम आसीत् वाचस्पतिः मिश्रः । यः ब्रह्मसूत्राणां शाङ्करभाष्यस्योपरि भामतीटीकां रचितवान् या विदुषां परिषदि सदैव सम्मानिता। सः अन्यानाम् अपि ग्रन्थानाम् उपरि स्वकीयां टीकां रचितवान्।

## मासवार्ता

### आरब्धः स्तोत्रपाठवर्गः

संस्कृतभाषायां निहितानि स्तोत्राणि पठितुम् इच्छुकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन जनवरीमासस्य २१ दिनाङ्के स्तोत्रपाठवर्गः आरब्धः वर्तते । अभ्यासक्रमेऽस्मिन् निश्चितस्तोत्राणि तद्यथा गणेशाथर्वशीर्षम्, सङ्कटनाशकगणेशस्तोत्रम्, द्वादशज्योतिर्लिङ्गस्तोत्रम्, शिवताण्डवस्तोत्रम्, शिवमानसपूजा, रामरक्षास्तोत्रम्, नवग्रहस्तोत्रं च छात्राः पठिष्यन्ति । संस्कृतरसिकानां जिज्ञासाम् इच्छां च विज्ञाय संस्थानेन अभ्यासक्रमोऽयम्-आरब्धः वर्तते । श्रीऋषिः पुरोहितः छात्रेभ्यः मार्गदर्शनं प्रदास्यति । अत्र उल्लेखनीयं यत् अभ्यासक्रमेऽस्मिन् २५ छात्राः प्रवेशं स्वीकृतवन्तः।

# क्रिकेट्-क्रीडा

डॉ. सुखेश्वरः झा

'क्रिकेट' (Cricket) इत्येषा आङ्गलेयी अभिव्यक्तिः। 'क्रिकेट' इत्यस्य अनेकेषु अर्थेषु सत्स्वपि इह विश्व-प्रसिद्धायाः एकस्याः क्रीडाया अभिधानतैव केवलं प्रतीयते। 'क्रीडा' इति भाव-प्रधानशब्दः, क्रीडनम् इति। किम्वा कर्म-प्रधानः क्रीड्यत इति। तस्मात् 'क्रिकेट' - अभिधाना क्रीडा क्रिकेट-क्रीडा इति शाब्दबोधं विजानीयात्। यस्याः क्रीडायाः 'क्रिकेट' इति नाम सा क्रिकेट-क्रीडा इति यावत्।

आङ्ग्लजनानाम् इयं ग्रीष्मसमयस्य राष्ट्रियक्रीडा कथ्यते। अनस्तसूर्यसाम्राज्यानां तेषां प्रभावः समस्ते पृथ्वीमण्डले कदाचिदासीत्। अतः अनेकेषु देशेषु इयं क्रीडा प्रचलिता अभवत्, विशेषतः 'इङ्गलेण्ड-आष्ट्रेलिया-न्यूज़ीलेण्ड-साउथाफ्रिका-भारत-पाकिस्तान-वेस्ट-इण्डीज़-इत्येतेषु अस्याः विशिष्टः प्रचारः विद्यते।

अथ एवं मन्यते यत् स्टूलबॉल(stool-ball) इति या काचित् पुरातनी क्रीडा तस्याः एव विकासः साम्प्रतिक्याः क्रिकेट-क्रीडायाः रूपेण सञ्जातः इति। 'हैम्पशायर' इत्यस्य हेम्ब्लेडन नामके स्थाने १७५० तमे खृष्टाब्दे प्रथमः 'क्रिकेट्-क्लब' इति अस्याः क्रीडायाः सङ्घः स्थापितः। १७८७ तमे वर्षे स्थापितः एम्.सी.सी. (Morylebone Cricket club) नामकः क्रीडा-सङ्घः अस्याः क्रीडायाः आचारसंहितां प्राथम्येन निर्माय अस्याः क्रीडायाः नियामकः अधिकारी सम्पन्नः।

चिक्रीडिषूणाम् इह द्वौ पक्षौ भवतः। प्रतिपक्षम् एकादश एकादश स्पर्द्धिनो भवन्ति। संहत्य द्वाविंशतिः क्रीडकाः भवन्ति। 'बैट' इति 'बॉल' इति 'विकेट' (bat, ball, wicket) इति च प्राधान्येन क्रीडा-सामग्र्यः अत्र प्रयुज्यन्ते। काष्ठनिर्मितः बैटपदार्थः ४.१/२ इञ्च-प्रमाणात् नाधिकम् आयतः न च ३८ इञ्च-प्रमाणात् लम्बतरः, यस्य मुष्टिः १४ इञ्च-दीर्घा भवति। 'बॉल' पदार्थः ५.१/२ OZ. (ऑन्स्) इत्यतोऽन्यूनः तथा ५.३/४ OZ. इत्यतोऽनधिकः गुरुतायां, परिधिः (गोलाकारश्च) तस्य ९ इञ्च-प्राय-प्रमाणः; कॉक(cork) इत्यस्योपरि तन्त्वादेः कुण्डलीकरणात् आवारकादिना पिण्डीकरणद्वारा विशेषप्रकारेण निर्मितः भवति। विकेट-पदार्थः ८-९ इञ्च-परिमितायामकः २८ इञ्च-दीर्घः यष्टि-त्रयात्मकः भवति।

क्रीडा-प्राङ्गणस्य मध्ये चतुश्चत्वारिंशद्-हस्त-लम्बः प्रदेशः 'पिच' (pitch) इत्युच्यते। 'पिच' इत्यस्य द्वयोः अन्तयोः (न तु पार्श्वयोः) विकेटपदार्थः आरोप्यते। मध्ये तावान् दीर्घः सुन्दरः कटः (कालीन इति) आस्तीर्यते, यावता उभयतः आरोपितौ विकेट-पदार्थौ स्पृष्टौ भवतः तथा कन्दुके सबलम् आहत्य बैटचालकः धावकश्च परस्परं विपरीतदिशायां विकेट-पर्यन्तं कटेन आस्तीर्णेन धावतः। अपरः पक्षः यावत् कन्दुकम् आनयति तावत् यति वारं धावनानि (runs)भवन्ति तान्येव धावनानि आधृत्य क्रीडान्ते विजयपराजययोः निर्धारः क्रियते। उभयोः एव पक्षयोः द्वे द्वे पाल्यौ (innings) भवतः।

(क्रमशः...)

## मासवार्ता

### आरब्धौ Online संस्कृतभाषाशिक्षणवर्गौ




संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य अनेकान् वर्गान् नियमितम् आयोजयति । एतस्मिन् एव उपक्रमे जनवरीमासे संस्कृतभाषाशिक्षणस्य द्वौ वर्गौ आरब्धौ वर्तेते । अनयोः वर्गयोः छात्राः प्राथमिकं संस्कृतं प्रथमस्तरीयं संस्कृतं च पठिष्यन्ति । अत्र उल्लेखनीयं यत् अभ्यासक्रमेऽस्मिन् देशविदेशेभ्यः ३७ छात्राः भागम् अवहन् । अभ्यासक्रमोऽयम् एप्रिलमासस्य द्वितीयसप्ताहं यावत् प्रचलिष्यति ।

### आयोजितानि व्याख्यानानि



संस्कृतरसिकाः संस्कृतसाहित्यस्य परिचयं प्राप्नुयुः इति विचार्य संस्कृतविद्याप्रतिष्ठानं चेरिटेबल ट्रस्ट, एकलव्य-संस्कृत-एकेडेमी, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वादव्याख्यानमालायाः आयोजनं जनवरीमासे अभवत् । कार्यक्रमेऽस्मिन् १६ दिनाङ्के डॉ. नीरजा गुप्ता Power of "सौन्दर्यलहरी" इति विषये, २३ दिनाङ्के प्रो. नेहा कृष्ण कुमार "पूर्णमदः पूर्णमिदम्" इति विषये, ३० दिनाङ्के डॉ. दीपेशः कतिरा "महर्षि पाणिनि के शब्दों की अद्भुत दुनिया" इति विषये मनोहरं व्याख्यानं प्रायच्छत् । व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन् ।

### सम्पन्नः संस्कृतभाषाशिक्षणस्य प्राथमिकः वर्गः

संस्कृतभाषायाः परिचयं प्राप्य अग्रे अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते संस्कृतभाषाशिक्षणस्य प्राथमिकः वर्गः डिसेम्बरमासस्य १४ दिनाङ्कतः जनवरीमासस्य ४ दिनाङ्कं यावत् प्राचलत् । वर्गेऽस्मिन् १५ छात्राः संस्कृतभाषायाः अध्ययनम् अकुर्वन् । प्राथमिकं संस्कृतं पठित्वा सर्वे छात्राः प्रसन्नाः आसन् ।

## कृपया हसन्तु

शिक्षकः - (नमनं प्रति) कः पक्षी तीव्रगत्या डयते ?

नमनः - यस्य कुत्रचित् गन्तुं शीघ्रता भवति सः !

★ ★ ★ ★ ★

एकस्मिन् न्यायालये दुर्घटनायाः कश्चन अभियोगः प्रचलन् आसीत्.... ।

न्यायाधीशः- (अपराधिनं प्रति) त्वया उक्तं यत् त्वं यानं मन्दं चालयन् आसीः । अत्र तव समीपे किं प्रमाणं वर्तते ?

अपराधी - महोदय ! तस्मिन् दिने अहं मम पत्नीं स्वीकर्तुं श्वसुरगृहं गच्छन् आसम् ।

न्यायाधीशः- एतं मुञ्चतु । एषः निरपराधी वर्तते ।

★ ★ ★ ★ ★

ह्यः मम गणितविषयस्य शिक्षिका मार्गे अमिलत् । अहं तां प्रणम्य तस्याः कुशलवार्तां पृष्ट्वा तस्याः दूरभाषक्रमाङ्कं याचितवान् ।

सा अवदत् - "लिख । नवार्बुद, चतुरशितिः कोटिः, अष्टादश-लक्ष, सप्तविंशतिसहस्रं, पञ्चशतं, पञ्चपञ्चाशत् ।"

अहं तां पुनः प्रणम्य ततः प्रस्थितः ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**विष्णोः का वल्लभा देवी लोकत्रितयचारिणी ? ।**
**वर्णावाद्यन्तिमौ दत्वा कः शब्दः तुल्यवाचकः ? ॥**

त्रिषु लोकेषु या सञ्चरति, या विष्णोः प्रिया पत्नी सा का ? तस्य शब्दस्य आदौ अन्ते च एकैकः वर्णः यदि योज्यते तर्हि तुल्यवाचकः शब्दः भवति । कः सः शब्दः ?

**उत्तरम्** – समानम्

**वृक्षस्याग्रे फलं दृष्टं फलाग्रे वृक्ष एव च ।**
**अकारादिसकारान्तं यो जानाति सः पण्डितः ॥**

वृक्षस्य अग्रभागे फलं दृश्यते । पुनः फलस्य अग्रे वृक्षः दृश्यते । अस्य शब्दस्य आदौ अकारः अन्ते सकारश्च विद्यते । यः उत्तरं जानाति सः पण्डितः ।

**उत्तरम्** – अनानस्

**वृक्षाग्रवासी न च पक्षिजातिः तृणं च शय्या न च राजयोगी ।**
**आपीतवर्णो न च हेमधातुः अतश्च ताम्रः सुरसः क एषः ? ॥**

वृक्षस्य उपरि भवति, किन्तु पक्षी न । तृणस्य उपरि शेते, किन्तु योगी न । पीतवर्णीयः भवति, किन्तु सुवर्णं न । अतः सुगन्धयुक्तः ताम्रः । किम् एतत् ? 'अतः' इत्येतस्य अर्थद्वयम् – 'तस्मात्' 'तकाररहितम्' इति च । 'ताम्रः' इत्यत्र तकारः निष्कासनीयः ।

**उत्तरम्** – आम्रः

## ज्ञानसरिता

श्यामः पटेलः

**जलचरः अष्टभुजः** – अष्टाभिः भुजाभिः वा पादैः युक्तः ''ओक्टोपस'' नाम्ना विख्यातः जलचरः एकः विलक्षणजन्तुः अस्ति। समुद्रेषु अष्टभुजस्य ३०० यावत्यः प्रजातयः प्राप्यन्ते। समुद्रस्य गभीरे नीरे मत्स्यपक्षः इव पक्षयुक्ताः एवञ्च समुद्रतटीये ईषज्जले अपक्षाः (पक्षहीनाः) अष्टभुजाः दृश्यन्ते।

अष्टभुजस्य शरीरे एकमपि अस्थि न भवति। अष्टभुजस्य गोलाकारमस्तके नेत्रद्वयं भवति। तस्य मुखं खगानां चञ्चुः इव दृढचञ्चोः निर्मितं भवति। वैशिष्ट्यम् अस्ति यत् तस्य त्रीणि हृदयानि भवन्ति। जलचरजन्तुषु अयं बुद्धिमान् जन्तुः मतः। यदा अष्टभुजः बिभेति तदा प्रच्छन्नीभवितुं सः स्वशरीरस्य वर्णं परिवर्तयति।

केचन अष्टभुजाः शार्कनामाख्यात् मत्स्यात् आत्मरक्षार्थं निजपुच्छात् नीलवर्णस्य द्रव्यस्य धारां मुञ्चन्ते। अनेन तत्रत्यं जलं नीलवर्णियं भवति। अतः शार्कमत्स्यः किमपि द्रष्टुं नार्हति। अनेन प्रकारेण ते पलायित्वा स्वात्मरक्षणं कुर्वन्ति। कदाचित् ते स्वकीयान् अष्टान् पादान् वा भुजाः त्यजन्ति। यदा शार्कमत्स्यः तान् पादान् सङ्ग्रहीतुं गच्छति तदा ते ततः निर्गच्छन्ति। अनन्तरं तेषाम् अष्टपादाः वा भुजाः पुनः जायन्ते।

अष्टभुजस्य दृष्टिः अतितीक्ष्णा भवति। अष्टभुजस्य प्रणयिनी एकस्मिन् समये एव लक्षद्वयानाम् अण्डानां प्रसवं करोति। किन्तु तेषु केचन एव जन्म स्वीकुर्वन्ति। अष्टभुजः सार्धैकवर्षं यावत् जीवति। विश्वे गुरुत्तमः अष्टभुजः ''जायन्ट पैसिफिक एन्टरोक्टोपस'' अस्ति। यस्य पादाः १४ फीटपरिमिताः यावत् दीर्घाः एवञ्च एकस्य पादस्य भारः १५ किलोग्रामपरिमितः भवति।

पक्षः – wing, चञ्चु – beak, पुच्छः – tail, गुरुत्तमः – biggest

## शब्दमञ्जूषा

| | |
|---|---|
| **प्रधानन्यायाधिपतिः** | chief justice |
| **चलचित्रम्** | cinema |
| **नगररक्षकः** | civil guard |
| **नागरिकशल्यचिकित्सकः** | civil surgeon |
| **राजस्वसमाहर्ता** | collector |
| **महाविद्यालयः** | college |
| **प्रधानसेनापतिः** | commander-in-chief |
| **शासननियोगः** | commission |
| **आयुक्तः** | commissioner |
| **समितिः** | committee |
| **समाजः** | community |
| **साम्यवादी** | communist |
| **राज्यमण्डलम्** | confederation |
| **मन्त्रणासम्मेलनम्** | conference |
| **रूढिवादी** | conservative |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कस्य गणना विक्रमादित्यस्य नवरत्नेषु भवति स्म ?**

(क) टोडरमलस्य (ख) जगनिकस्य (ग) अमरसिंहस्य (घ) चन्दबरदाईमहात्मनः

**२ ) एतेषु कस्मिन् ग्रन्थे श्रीरामस्य कथायाः सुन्दरं वर्णनम् अस्ति ?**

(क) रामायण (ख) महाभारत (ग) ऋग्वेद (घ) सामवेद

**३ ) एतेषु कस्मिन् ग्रन्थे कौरवपाण्डवयोः सङ्घर्षकथा वर्तते ?**

(क) रामायण (ख) मनुस्मृति (ग) ऋग्वेद (घ) महाभारत

**४ ) 'ओणम्' कस्य प्रदेशस्य प्रमुखोत्सवः वर्तते ?**

(क) केरल (ख) आन्ध्र (ग) तुमिलनाडु (घ) कर्णाटक

**५ ) 'गुढ़ी पाड़वा' कस्यां तिथौ आचर्यते ?**

(क) वैशाखकृष्णपञ्चम्याम् (ख) चैत्रशुक्लदशम्याम्
(ग) आश्विनपूर्णिमायाम् (घ) चैत्रशुक्लप्रतिपदायाम्

**६ ) हिन्दुपञ्चाङ्गानुगुणं नवसंवत्सरस्य आरम्भः कस्मात् मासात् भवति ?**

(क) ज्येष्ठ (ख) वैशाख (ग) पौष (घ) चैत्र

**७ ) शस्त्रपूजा कस्यां तिथौ भवति ?**

(क) गणेशचतुर्थ्याम् (ख) विजयादशम्यां (ग) गुरूपूर्णिमायाम् (घ) नागपञ्चम्याम्

उत्तराणि – (१) ग (२) क (३) घ (४) क (५) घ (६) घ (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Admission Open**

## Value Education Through Sanskrit in

## बालसंस्कृतवर्गः

(Class SKg to 8)

**Date :** 12/6/21 to 26/3/22
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 5000/-

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Admission Open**

## संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 12/4/21 to 14/7/21
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm
**Fees :** 5000/-

**Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

**Learn Online**

## छन्दःपरिचयः

**Date :** 12/2/21 to 13/3/21
**Day :** Fri-Sat
**Time :** 8:00 am to 9:30 am
**Fees :** 2000/-

**Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

### संस्कृत- साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006